हरिः ॐ।

नम सर्वेभ्यः ।

भाषितसंस्कृतवर्गे

सर्वेषां स्वागतम्।

ॐ सह नाववतु ।
सह नौ भुनक्तु ।
सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः ॥

स्रंसते हाततश्चापयोः वेपथुर्जायते तनौ ।
मनो भ्रमति तेनासौ रथे नैवावतिष्टते ।।6।।

स्रंसते - स्रन्सुँ अवस्रंसने - स्रंस्
(भ्वादिः आत्मनेपदी अकर्मकः सेट् द्युतादिः)
कर्तरि लट्लकारः (आत्मनेपदम्)
स्रंसते स्रंसेते स्रंसन्ते
स्रंससे स्रंसेथे स्रंसध्वे
स्रंसे स्रंसावहे स्रंसामहे

---- जायते - जनीँ प्रादुर्भावे-
---- जन् (दिवादिः आत्मनेपदी अकर्मकः सेट्)
---- कर्तरि लट्लकारः (आत्मनेपदम्)
---- जायते जायेते जायन्ते
---- जायसे जायेथे जायध्वे
---- जाये जायावहे जायामहे

भ्रमति - भ्रमुँ चलने--
भ्रम् (भ्वादिः परस्मैपदी अकर्मकः सेट् ज्वलादिः)
कर्तरि लट्लकारः (परस्मैपदम्)
भ्रमति , भ्रम्यति -- भ्रमतः , भ्रम्यतः -- भ्रमन्ति , भ्रम्यन्ति
भ्रमसि , भ्रम्यसि -- भ्रमथः , भ्रम्यथः -- भ्रमथ , भ्रम्यथ
भ्रमामि , भ्रम्यामि -- भ्रमावः , भ्रम्यावः-- भ्रमामः , भ्रम्यामः

अवतिष्टते - अव्+तिष्टते - स्था ष्ठा गतिनिवृत्तौ- स्था - अव + स्थासेवा करना, थमना, स्थिर रहना

विसृजत्यात्मनश्चापं तत्रैवोपविशत्ययम्।
पुनश्चावेक्षते सर्वान् तेन खेदोऽभिवर्धते ॥7॥

विसृजति - वि+सृजति - सृज् -वि + सृज्= छोड देना ---- उपविशति = उप+विशति - विशँ प्रवेशने
सृजँ विसर्गे (तुदादिः परस्मैपदी सकर्मकः अनिट्) ---- विश् (तुदादिः परस्मैपदी सकर्मकः अनिट्)
कर्तरि लट्लकारः (परस्मैपदम्) ---- कर्तरि लट्लकारः (परस्मैपदम्)
सृजति सृजतः सृजन्ति ---- विशति विशतः विशन्ति
सृजसि सृजथः सृजथ ---- विशसि विशथः विशथ
सृजामि सृजावः सृजामः ---- विशामि विशावः विशामः
अव + ईक्ष् देखना, निहारना --ईक्षँ दर्शने-- अभिवर्धते -- अभि+ वर्धते- वृधुँ वृद्धौ
ईक्ष् (भ्वादिः आत्मनेपदी सकर्मकः सेट्) --वृध् (भ्वादिः आत्मनेपदी अकर्मकः सेट् द्युतादिः वृतादिः)
कर्तरि लट्लकारः (आत्मनेपदम्) ---कर्तरि लट्लकारः (आत्मनेपदम्)
ईक्षते ईक्षेते ईक्षन्ते --- वर्धते वर्धेते वर्धन्ते
ईक्षसे ईक्षेथे ईक्षध्वे --- वर्धसे वर्धेथे वर्धध्वे
ईक्षे ईक्षावहे ईक्षामहे ---- वर्धे वर्धावहे वर्धामहे

पश्चात्प्रभाषते कृष्णं राज्यं भोगं सुखानि च।
न काङ्क्षे न च वा भुञ्जे नैव हन्मीति बान्धवान् ।।8।।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रभाषते = प्र+भाषते- भाषँ व्यक्तायां वाचि | | | --- | काक्षिँ काङ्क्षायाम् - | | |
| भाष् (भ्वादिः आत्मनेपदी सकर्मकः सेट्) | | | --- | काङ्क्ष् (भ्वादिः परस्मैपदी सकर्मकः सेट्) | | |
| कर्तरि लट्लकारः (आत्मनेपदम्) | | | --- | कर्तरि विधिलिङ्लकारः (परस्मैपदम्) | | |
| भाषते | भाषेते | भाषन्ते | --- | काङ्क्षेत् | काङ्क्षेताम् | काङ्क्षेयुः |
| भाषसे | भाषेथे | भाषध्वे | --- | काङ्क्षेः | काङ्क्षेतम् | काङ्क्षेत |
| भाषे | भाषावहे | भाषामहे | --- | काङ्क्षेयम् | काङ्क्षेव | काङ्क्षेम |

| | | | | | | |
|---|---|---|---|---|---|---|
| भुजँ पालनाभ्यवहारयोः - | | | --- | हनँ हिंसागत्योः | | |
| भुज् (रुधादिः उभयपदी सकर्मकः अनिट्) | | | --- | हन् (अदादिः परस्मैपदी सकर्मकः अनिट्) | | |
| कर्तरि लट्लकारः (आत्मनेपदम्) | | | --- | कर्तरि लट्लकारः (परस्मैपदम्) | | |
| भुङ्क्ते | भुञ्जाते | भुञ्जते | --- | हन्ति | हतः | घ्नन्ति |
| भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे | --- | हंसि | हथः | हथ |
| भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे | --- | हन्मि | हन्वः | हन्मः |

कृष्णः संश्रृणुते सर्वं पुनश्चोपदिशत्यमुम् ।
ज्ञानं भक्ति तथा योग साङ्ख्य कर्म तथाखिलम् ।।9।।

संश्रृणुते- सम्+ श्रृणुते - श्रु श्रवणे - श्रु (भ्वादिः परस्मैपदी सकर्मकः अनिट्)
कर्तरि लट्लकारः (परस्मैपदम्)

| | | |
|---|---|---|
| श्रृणोति | श्रृणुतः | श्रृण्वन्ति |
| श्रृणोषि | श्रृणुथः | श्रृणुथ |
| श्रृणोमि | श्रृण्वः , श्रृणुवः | श्रृण्मः , श्रृणुमः |

ऊपदिशति = उप+दिश् - दिश् - दिशँ अतिसर्जने
कर्तरि लट्लकारः (परस्मैपदम्)

| | | |
|---|---|---|
| दिशति | दिशतः | दिशन्ति |
| दिशसि | दिशथः | दिशथ |
| दिशामि | दिशावः | दिशामः |

प्रजहात्यर्जुनः क्लैब्यं पुनश्चायं न शोचति ।
प्रणश्यति हि सम्मोहः तेनासौ विन्दते स्मृतिम् ||10||

| | |
|---|---|
| प्रजहाति= प्र+जहाति - ओँहाक् त्यागे | --- शोचति - शुचँ शोके |
| हा (जुहोत्यादिः परस्मैपदी सकर्मकः अनिट्) | --- शुच् (भ्वादिः परस्मैपदी अकर्मकः सेट्) |
| कर्तरि लट्लकारः (परस्मैपदम्) | --- कर्तरि लट्लकारः (परस्मैपदम्) |
| जहाति जहितः , जहीतः जहति | --- शोचति शोचतः शोचन्ति |
| जहासि जहिथः , जहीथः जहिथ , जहीथ | --- शोचसि शोचथः शोचथ |
| जहामि जहिवः , जहीवः जहिमः , जहीमः | --- शोचामि शोचावः शोचामः |

| | |
|---|---|
| प्रणश्यति - प्र+ नश् - णशँ अदर्शने | --- विन्दते - विदॢँ लाभे |
| नश् (दिवादिः परस्मैपदी अकर्मकः वेट्) | --- विद् (तुदादिः उभयपदी सकर्मकः सेट् मुचादिः) |
| कर्तरि लट्लकारः (परस्मैपदम्) | --- कर्तरि लट्लकारः (आत्मनेपदम्) |
| नश्यति नश्यतः नश्यन्ति | --- विन्दते विन्देते विन्दन्ते |
| नश्यसि नश्यथः नश्यथ | --- विन्दसे विन्देथे विन्दध्वे |
| नश्यामि नश्यावः नश्यामः | --- विन्दे विन्दावहे विन्दामहे |

ब्रूते च माधवं पार्थः करिष्ये वचनं तव ।
ततो युद्धाय सन्नाह कुर्वन्नुत्तिष्ठति स्वयम् ।। 11॥

ब्रूते - ब्रूञ् व्यक्तायां वाचि --- करिष्ये - कृ -डुकृञ् करणे
ब्रू (अदादिः उभयपदी द्विकर्मकः सेट्) --- कृ (तनादिः उभयपदी सकर्मकः अनिट् भिदादिः)
कर्तरि लट्लकारः (आत्मनेपदम्) --- भावकर्मणोः लृट्लकारः (आत्मनेपदम्)
ब्रूते बुवाते बुवते --- कारिष्यते , करिष्यते कारिष्येते , करिष्येते कारिष्यन्ते , करिष्यन्ते
ब्रूषे बुवाथे ब्रूध्वे --- कारिष्यसे , करिष्यसे कारिष्येथे , करिष्येथे कारिष्यध्वे , करिष्यध्वे
बुवे ब्रूवहे ब्रूमहे --- कारिष्ये - करिष्ये- कारिष्यावहे -करिष्यावहे, कारिष्यामहे - करिष्यामहे

उत्तिष्टति - उत्+तिष्टति - स्था - ष्ठा गतिनिवृत्तौ -उत् + स्थाखड़ा होना, आसन से उठाना
स्था (भ्वादिः परस्मैपदी अकर्मकः अनिट्)
कर्तरि लट्लकारः (परस्मैपदम्)

| | | |
|---|---|---|
| तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| तिष्ठसि | तिष्ठथः | तिष्ठथ |
| तिष्ठामि | तिष्ठावः | तिष्ठामः |

योऽधीतेऽहर्निशं भक्त्या धर्म्यं संवादमुत्तमम् ।
स पुण्यकर्मणां लोकान् अवाप्नोति न संशयः ।।12।।

अधिते - इङ् अध्ययने
इ (अदादिः आत्मनेपदी सकर्मकः अनिट्)
कर्तरि लट्लकारः (आत्मनेपदम्)

| | | |
|---|---|---|
| अधीते | अधीयाते | अधीयते |
| अधीषे | अधीयाथे | अधीध्वे |
| अधीये | अधीवहे | अधीमहे |

अवाप्नोति = अव+आप्नोति = आपॣ व्याप्तौ
आप् (स्वादिः परस्मैपदी सकर्मकः अनिट्)
कर्तरि लट्लकारः (परस्मैपदम्)

| | | |
|---|---|---|
| आप्नोति | आप्नुतः | आप्नुवन्ति |
| आप्नोषि | आप्नुथः | आप्नुथ |
| आप्नोमि | आप्नुवः | आप्नुमः |

# धातुरूपानां सिद्धिः

| सर्वधातुकः | आर्धधातुकः |
| --- | --- |
| धातुः+विकाराणप्रत्ययः+तिड़न्तप्रत्ययः | धातुः+लकारनिमित्तिकप्रत्ययः+तिड़न्तप्रत्ययः |
| [इत्(**धातुः**)इत्] + [इत्(**वि-प्रत्ययः**)इत्] + **तिड़**-प्रत्ययः | [इत्(**धातुः**)इत्] + सेट/अनिट + [इत्(**ल-प्रत्ययः**)इत्] + **तिड़**-प्रत्ययः |
| डु**पचँ**ष् (डु+**पच्**+अँ+ष्) + शप् (श्+**अ**+प्) +**ति**प् | [पठँ (**पठ्**+अँ)] + **इ**ट् + **स्य** + **ति**प् |
| पच्+अ+ति= **पचति** | पठ्+इ+स्य+ति = **पठिष्यति** |

तिप् तस् झि - सिप् थस् थ – मिप् वस् मस् --- त आताम् झ - स् आथाम् ध्वम् - इट् वहिङ् महिङ्

ति तः अन्ति - सि थः थ - मि वः मः --- त ताम् अन्त – स् थाम् ध्वम् - इ वहि महि

# विकरणप्रत्ययाः

| गणः | विकरणप्रत्ययः | उदाहरणम् |
|---|---|---|
| भु-आदि | शप् (श्+**अ**+प्) | (भु+**अ**+ति) **भवति** |
| अद्-आदि | शप् (लुक्-लोपः) | (अद्+ति) **अत्ति** |
| जुहोति-आदि | श्लुः (लुक्-लोपः) | (जुहो+ति) **जुहोति** |
| दिव्-आदि | श्यन् (श्+**य**+न्) | (दिव्+**य**+ति) **दिव्यति** |
| सु-आदि | श्नुः(श्+**नु**) | (सु+**नु**+ति) **सुनोति** |
| तुद्-आदि | शः(श्+**अ**) | (तुद्+**अ**+ति) **तुदति** |
| रुध्-आदि | श्नम् (श+**न**+म्) | (रु-**न**-ध् +ति) **रुणद्धि** |
| तन्-आदि | **उः** | (तन्+**उ**+ति) **तनोति** |
| क्री-आदि | श्ना (श्+**ना**) | (क्री+**ना**+ति) **क्रीणाति** |
| चुर्-आदि | णिच्+शप् (**इ**+**अ**) | (चुर्+**इ**+**अ**+ति) **चोरयति** |

# चार गणों के अदन्त अङ्गों के लिये तिङ् सार्वधातुक प्रत्यय

**लट् लकार:**

| | परस्मैपदम् | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *ति* | त: | अन्ति | ते | इते | अन्ते |
| म. पु. | *सि* | थ: | थ | से | इथे | ध्वे |
| उ. पु. | *मि* | व: | म: | ए | वहे | महे |

**लोट् लकार:**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *तु,* तात् | ताम् | अन्तु | ताम् | इताम् | अन्ताम् |
| म. पु. | ०, तात् | तम् | त | स्व | इथाम् | ध्वम् |
| उ. पु | ***आनि*** | ***आव*** | ***आम*** | ***ऐ*** | ***आवहै*** | ***आमहै*** |

**लङ् लकार:**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *त्* | ताम् | अन् | त | इताम् | अन्त |
| म. पु. | *स् (:)* | तम् | त | था: | इथाम् | ध्वम् |
| उ. पु. | *अम्* | व | म | इ | वहि | महि |

**विधिलिङ् लकार:**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | इत् | इताम् | इयु: | ईत | ईयाताम् | ईरन् |
| म. पु. | इ: | इतम् | इत | ईथा: | ईयाथाम् | ईध्वम् |
| उ. पु. | इयम् | इव | इम | ईय | ईवहि | ईमहि |

**तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ्।**

ये १८ तिङ् प्रत्यय हैं। इन्हीं की आकृति बदल बदलकर दस लकारों के प्रत्यय बन जाते हैं। अत: दसों लकारों के प्रत्यय तिङ् ही कहलाते हैं।

# छह गणों के अनदन्त अङ्गों के लिये तिङ्सार्वधातुकप्रत्यय

## लट् लकारः

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *ति* | तः | अन्ति / अति | ते | आते | अते |
| म. पु. | *सि* | थः | थ | से | आथे | ध्वे |
| उ. पु. | *मि* | वः | मः | ए | वहे | महे |

## लोट् लकारः

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *तु* | ताम् | अन्तु / अतु | ताम् | आताम् | अताम् |
| म. पु. | हि | तम् | त | स्व | आथाम् | ध्वम् |
| उ. पु | ***आनि*** | ***आव*** | ***आम*** | ***ऐ*** | ***आवहै*** | ***आमहै*** |

## लङ् लकारः

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *त्* | ताम् | अन् / उः | त | आताम् | अत |
| म. पु. | *स् ( : )* | तम् | त | थाः | आथाम् | ध्वम् |
| उ. पु. | *अम्* | व | म | इ | वहि | महि |

## विधिलिङ् लकारः

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | यात् | याताम् | युः | ईत | ईयाताम् | ईरन् |
| म. पु. | याः | यातम् | यात | ईथाः | ईयाथाम् | ईध्वम् |
| उ. पु. | याम् | याव | याम | ईय | ईवहि | ईमहि |

ॐ सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु
मा कश्चिद्दुःखभाग्भवेत् ।
ॐ शान्तिः शान्तिः शान्तिः ।।